# Shri Ramakrishna dhyanam

# श्रीरामकृष्णध्यानम्

## Document Information

Text title : Shri Ramakrishna dhyanam

File name : rAmakRRiShNadhyAnam.itx

Category : deities_misc, gurudev, rAmakRiShNa, dhyAnam

Location : doc_deities_misc

Author : Umeshachandra Chakravarti

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीरामकृष्णध्यानम्

रामकृष्णं स्मरेन्नित्यं भक्तहृद्दिविलासिनम् ।
उज्ज्वलताम्रवर्णाभं वस्त्रयज्ञोपवीतिनम् ॥ १॥

प्रशस्तोरःस्थलं देवं द्विभुजं सौम्यदर्शनम् ।
सहास्यवदनोपेतं चारुश्मश्रुविभूषितम् ॥ २॥

विधृतसहजासनं बालसारल्यसंयुतम् ।
त्रिभिर्गुणैः प्रमुक्तं च सर्वगुणस्वरूपिणम् ॥ ३॥

सूक्ष्मादपिमहत् सूक्ष्मं विराजं भौममुत्तमम् ।
लोकाचारमतिक्रान्तं लोककल्याणकारकम् ॥ ४॥

प्रेमार्द्रचित्तमक्षोभ्यं सर्वलोकानुकम्पकम् ।
भावसमाधिसन्मग्नं धर्मभेदनिवर्तकम् ॥ ५॥

अवतीर्णं निरक्षरं ब्राह्मणं मातृसाधकम् ।
कृतदारमपि-नूत्न संन्यासव्रतपालकम् ॥ ६॥

व्यक्तमव्यक्तमेव च सच्चिदानन्दविग्रहम् ।
विमलं परमं हंसं गदाधर जगद्गुरुम् ॥ ७॥

इति श्रीउमेशचन्द्रचक्रवर्तिविरचितं
“श्रीश्रीरामकृष्णध्यानम्” सम्पूर्णम् ।

Proofread by Aruna Narayanan

Please send corrections to *sanskrit@cheerful.com*